# Shri Vaishnavacharyapranitam Siddhanta Panchakam

# શ્રીવૈષ્ણવાચાર્યપ્રણીતં સિદ્ધાન્તપઞ્ચકમ્

## Document Information

Text title : Shri Vaishnavacharyapranitam Siddhanta Panchakam

File name : siddhAntapanchakamvaiShNavAchArya.itx

Category : raama, rAmAnanda, panchaka

Location : doc_raama

Author : vaiShNavAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીવૈષ્ણવાચાર્યપ્રણીતં સિદ્ધાન્તપઞ્ચકમ્

## ૧. શ્રીસમ્પ્રદાયસિદ્ધાન્તઃ વિશિષ્ટાદ્વૈત

વિશિષ્ટાદ્વૈતસિદ્ધાન્તો રામાનન્દાર્યસમ્મતઃ ।
બ્રહ્મત્વેન મતસ્તત્ર શ્રીરામઃસદ્ગુણામ્બુધિઃ ॥ ૧॥

જગજ્જન્માદિહેતુશ્ચ સર્વાધારઃ સનાતનઃ ।
સર્વકર્મસમારાધ્યઃ સર્વકર્મફલપ્રદઃ ॥ ૨॥

સર્વેશઃ સર્વશેષી ચ નિત્યો વિશ્વકલેવરઃ ।
ઉપાદાનં નિમિત્તં ચ જગતો વ્યાપકસ્તથા ॥ ૩॥

સચ્ચિદાનન્દરૂપશ્ચ વિભૂતિદ્વયનાયકઃ ।
પૂર્ણઃ શ્રીસીતયા સાર્ધં ભગવાન્ વિશ્વમોહનઃ ॥ ૪॥

દિવ્યસિંહાસનાસીનો દિવ્યભૂષણભૂષિતઃ ।
દિવ્યાકારેણ સમ્પન્નઃ સર્વદોષવિવર્જિતઃ ॥ ૫॥

સેવિતો નિત્યમુક્તૈશ્ચ સર્વજ્ઞઃ સર્વશક્તિકઃ ।
દેશાદિકાપરિચ્છિન્નોઽવતારી ચેતનોઽજનિ ॥ ૬॥

વિશ્વં પરિણતિસ્તસ્ય વિકારી નો તથાપિ સઃ ।
પરિણામઃ પ્રકારાંશે નો વિશેષ્યે યતો મતઃ ॥ ૭॥

ઇન્દ્રિયપ્રાણદેહેભ્યો જ્ઞાનાચ્ચાપિ વિલક્ષણઃ ।
જીવોઽણુશ્ચેતનો નિત્યો ભિન્નઃ પ્રતિકલેવરમ્ ॥ ૮॥

સુખજ્ઞાનસ્વરૂપશ્ચાચિન્ત્યોઽવ્યક્તસ્તથાઽજડઃ ।
રાઘવસ્ય નિયામ્યશ્ચ ધાર્યઃ શેષસ્તથા વપુઃ ॥ ૯॥

બ્રહ્માંશો બ્રહ્મભિન્નોઽથ કર્ત્તા ભોક્તાઽવિકારવાન્ ।
બદ્ધમુક્તવિભેદેન જીવો દ્વિધા સમીરિતઃ ॥ ૧૦॥

જગત્ સત્યમનિત્યં ચ દેહો રામસ્ય નો મૃષા ।
શ્રીસીતારામકૈર્યં મુક્તિઃ સાકેતધામનિ ॥ ૧૧॥

તત્રેશભોગસામ્યં હિ દુઃખબીજં ન વિદ્યતે ।
અર્ચિરાદિકયા ગત્યા સાયુજ્યં નૈવ ચાન્યથા ॥ ૧૨॥

મુક્તૌ ભોગ્યશ્ચ રામો હિ તારતમ્યં ન તત્ તદા ।
ભક્ત્યાઽથવા પ્રપત્ત્યા હિ મોક્ષો લભ્યેત નાન્યથા ॥ ૧૩॥

તૈલધારા યથા લોકે વિચ્છેદરહિતા તથા ।
જાનકીજાનકીનાથસ્મૃતિર્ભક્તિઃ પ્રકીર્તિતા ॥ ૧૪॥

પ્રપત્તિશ્ચાખિલં ત્યક્ત્વા રામાયાત્મનિવેદનમ્ ।
રામાનુકૂલસઙ્કલ્પઃ પ્રાતિકૂલ્યવિવર્જનમ્ ॥ ૧૫॥

વિશ્વાસો રક્ષણસ્યાથ વરણં ગોપનસ્ય હિ ।
કાર્પણ્યં ચાત્મનિક્ષેપઃ સા ચેતિ ષડ્ વિધા સ્મૃતા ॥ ૧૬॥

ઇતિ સિધ્દ્ધાન્તપઞ્ચકે પ્રથમઃ વિચ્છેદઃ । ૧।

## ૨. શ્રીબ્રહ્મસમ્પ્રદાયસિધ્દ્ધાન્તઃ દ્વૈતવાદ-

મધ્વાચાર્યમતશ્ચાથ દ્વૈતવાદોઽભિધીયતે ।
તત્ર સર્વોત્તમં તત્ત્વ ભગવાન્ વિષ્ણુરેવ હિ ॥ ૧॥

દેશકાલાનવચ્છિન્નઃ સૃષ્ટિસ્થિત્યન્તકારકઃ ।
સવિશેષઃ સ્વતન્ત્રોઽથ કલ્યાણગુણસાગરઃ ॥ ૨॥

સચ્ચિદાનન્દરૂપશ્ચ સર્વજ્ઞઃ સર્વશક્તિકઃ ।
જગતોઽસ્ય નિમિત્તત્વં મતં ચેશસ્ય કેવલમ્ ॥ ૩॥

પ્રકૃતિસ્તન્મતે વિશ્વસ્યોપાદાનતયા મતા ।
ઈશ્વરાનુચરો જીવઃ સચ્ચિદાનન્દરૂપવાન્ ॥ ૪॥

અણુર્બધ્દ્ધસ્તથાઽનાદિકાલાન્માયાવિમોહિતઃ ।
અજ્ઞત્વાદિકધર્માણામાશ્રયઃ પરવાઁસ્તથા ॥ ૫॥

અસ્વતન્ત્રમથો ચેશનિયામ્યં સત્ તથા જગત્ ।
વાસ્તવિકો મતો ભેદઃ પઞ્ચધા સ ઉદીરિતઃ ॥ ૬॥

જીવેશયોસ્તથા જીવાજ્જડસ્ય ચેશ્વરાદપિ ।
જીવાનાં ચ મિથો ભેદો જડાનાં ચ પરસ્પરમ્ ॥ ૭॥

ભેદાવબોધતો વિષ્ણુતદ્ગુણોત્કર્ષશેમુષી ।
તતશ્ચારાધ્ય વિષ્ણું તત્પ્રસાદેનાથ મુચ્યતે ॥ ૮॥

દિવ્યલોકં સમાસાદ્ય સ્વરૂપં પ્રાપ્યતે તથા ।
તારતમ્યં ચ જીવેષુ મુક્તાવપ્યુરરીકૃતમ્ ॥ ૯॥

મોક્ષસ્ય સાધનં ભક્તિઃ સા ચ નિષ્કામભાવતઃ ।
વેદાભ્યાસોઽવિલાસિત્વં તથા ચેન્દ્રિયસંયમઃ ॥ ૧૦॥

આશાભયપરિત્યાગ ઈશાયાત્મસમર્પણમ્ ।
સત્યા હિતપરા વાણી હરેર્દાસ્યે સ્પૃહા સદા ॥ ૧૧॥

દયા દાનં પ્રપન્નસ્ય વિપન્નસ્ય ચ રક્ષણમ્ ।
હરૌ ગુરૌ તથા શાસ્ત્રે શ્રદ્ધા દમ્ભવિવર્જિતા ॥ ૧૨॥

ઇતિ સિદ્ધાન્તપઞ્ચકે દ્વિતીયઃ પરિચ્છેદઃ । ૨।

## ૩. શ્રીરુદ્રસમ્પ્રદાયસિદ્ધાન્તઃ શુદ્ધાદ્વૈતવાદ

શ્રીવિષ્ણુસ્વામિસિદ્ધાન્તઃ શુદ્ધાદ્વૈતતયોચ્યતે ।
તત્ર બ્રહ્મ ચ સર્વજ્ઞઃ શ્રીકૃષ્ણો દેવકીસુતઃ ॥ ૧॥

સચ્ચિદાનન્દરૂપશ્ચ સર્વધર્મમહાર્ણવઃ ।
માયયા રહિતસ્તદ્વદનન્તાચિન્ત્યશક્તિકઃ ॥ ૨॥

શુદ્ધશ્ચ પરમઃ સેવ્યઃ સર્વેષાં પ્રાણિનાં તથા ।
અપરિચ્છિન્નરૂપઃ સ દિવ્યાનન્તગુણામ્બુધિઃ ॥ ૩॥

વિરુદ્ધાનાં ચ ધર્માણાં વાક્યાનામપિ તાદૃશામ્ ।
યુગપચ્ચ સમાવેશો ગોલોકાધિપતૌ ખલુ ॥ ૪॥

ચૈતન્યગુણકો જીવઃ શુદ્ધો બ્રહ્માંશ એવ હિ ।
અણુઃ કર્ત્તા તથા ભોક્તા ભિન્નઃ પ્રતિકલેવરમ્ ॥ ૫॥

આવિર્ભાવતિરોભાવૌ જગતઃ સ્તો હરિચ્છયા ।
પરિણતં પરં બ્રહ્મ જગદ્રૂપેણ લીલયા ॥ ૬॥

જગદવિકૃતશ્ચૈશઃ પરિણામો ન માયિકમ્ ।
સતોઽસ્ય પ્રકૃતિર્બ્રહ્મ બ્રહ્મશક્તિર્નિમિત્તકમ્ ॥ ૭॥

કાર્યકારણરૂપાભ્યાં સર્વદૈવ જગત્ સ્થિતમ્ ।
ગોલોકે શ્રીહરિપ્રાપ્તિર્મોક્ષઃ સુખમયઃ સ્મૃતઃ ॥ ૮॥

સર્વં કૃષ્ણમયં દૃષ્ટ્વા પ્રેમ્ણા શ્રીહરિસેવ્યા ।
પરમાનન્દરસે મગ્નઃ શુદ્ધો જીવસ્તદા ભવેત્ ॥ ૯॥

હરેરનુગ્રહઃ પુષ્ટિર્યા તતશ્ચોપજાયતે ।
પુષ્ટિભક્તિર્હિ સા પ્રોક્તા તયા જીવો વિમુચ્યતે ॥ ૧૦॥

ઇતિ સિદ્ધાન્તપઞ્ચકે તૃતીયઃ પરિચ્છેદઃ । ૩।

## ૪. શ્રીસનકાદિસમ્પ્રદાયસિદ્ધાન્તઃ દ્વૈતાદ્વૈતવાદ

દ્વૈતાદ્વૈતમતં ત્વત્ર નિમ્બાર્કાચાર્યસમ્મતમ્ ।
બ્રહ્મત્વેનમતસ્તત્ર શ્રીકૃષ્ણો રાધિકાપતિઃ ॥ ૧॥

અચિન્ત્યાનન્તશક્તિશ્ચ કલ્યાણગુણવારિધિઃ ।
વિભુર્દોષવિરોધી ચ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૨॥

સર્વજ્ઞાતા ચ વિશ્વસ્ય પ્રકૃતિશ્ચ નિમિત્તકમ્ ।
બ્રહ્મણઃ પરિણામસ્તુ શક્તિવિક્ષેપ એવ હિ ॥ ૩॥

ભિન્નઃ કૃષ્ણાદભિન્નશ્ચ જીવો બ્રહ્માંશ એવ હિ ।
અણુશ્ચેતનરૂપો જ્ઞો દેહાદિભ્યો વિલક્ષણઃ ॥ ૪॥

પ્રતિદેહં વિભિન્નઃ સ નિત્યાદિભેદતસ્ત્રિધા ।
નિત્યો બ્રહ્માત્મકશ્ચાત્મા બ્રહ્મવ્યાપ્યતયા મતઃ ॥ ૫॥

અમાયિકં જગત્ સત્યં ભિન્નાભિન્નં ચ કૃષ્ણતઃ ।
આદાવુત્પદ્યતે કૃષ્ણાદન્તે તત્રૈવ લીયતે ॥ ૬॥

ભગવદ્ભાવસમ્પ્રાપ્તિર્મુક્તિઃ સાયુજ્યનામિકા ।
અર્ચિરાદિકયા ગત્યા ગોલોકે પ્રાપ્યતે હિ સા ॥ ૭॥

શ્રીરાધાકૃષ્ણ પાદારવિન્દયોરનપાયિની ।
ભક્તિર્હિસાધનં મુક્તેર્નાન્યો માર્ગોઽસ્તિ તાં વિના ॥ ૮॥

ઇતિ સિદ્ધાન્તપઞ્ચકે ચતુર્થઃ પરિચ્છેદઃ । ૪।

## ૫. શ્રીમાધ્વગૌણેશ્વરસમ્પ્રદાયસિદ્ધાન્તઃ અચિન્ત્ય ભેદાભેદ

વાદ ચૈતન્યાભિમતોઽચિન્ત્યભેદાભેદઃ પ્રકીર્ત્તિત ।
તત્રેશ્વરઃસ્વતન્ત્રઃ શ્રીકૃષ્ણઃ પૂર્ણોઽથ મુક્તિદઃ ॥ ૧॥

કલ્યાણગુણસિન્ધુશ્ચ સચ્ચિદાનન્દવિગ્રહઃ ।
વ્યાપકત્વેઽપિ ભક્ત્યાઽઽપ્યઃ સત્વાદિગુણવર્જિતઃ ॥ ૨॥

કર્ત્તા ચૈકરસત્વેઽપિ જ્ઞાનાનન્દપ્રદાયકઃ ।
સર્વસ્ય જીવવર્ગસ્ય ભોક્તા ચ વિભુરવ્યયઃ ॥ ૩॥

ઉપાદાનં નિમિત્તં ચ સર્વસ્ય જગતસ્તથા ।
પરિણામો જગત્ તસ્ય સ્વીયશક્ત્યા હ્યચિન્ત્યયા ॥ ૪॥

પરિણામે વિકારીશો ન સ્યાચ્ચિન્તામણિર્યથા ।
ઈશસ્ય શક્તયઃ સંવિત્ સન્ધિની હ્લાદિની તથા ॥ ૫॥

અસ્મચ્છબ્દવાચ્યત્વં નિત્યં જ્ઞત્વં યથેશ્વરે ।
તથૈવ જીવવર્ગે તત્ તત્ત્વેન સમતોભયોઃ ॥ ૬॥

જીવો મતોઽણુચૈતન્યો ગુણઃ શક્તિસ્તથા વપુઃ ।
વિભુરીશો ગુણી દેહી તથા ચાચિન્ત્યશક્તિમાન્ ॥ ૭॥

જગત્ સત્યં તથા નિત્યં ન ચ મિથ્યા કદાપિ તત્ ।
ભગવત્પાદસમ્પ્રાપ્તિર્મુક્તિર્ગોલોકધામનિ ॥ ૮॥

ભગવદ્ધામસમ્પ્રાપ્તો મુક્તો ન ચ નિવર્ત્તતે ।
નાવર્ત્તયતિ યત્ કૃષ્ણો મુક્તો નાવર્ત્તતે સ્વતઃ ॥ ૯॥

મુખ્યં ચ સાધનં મુક્તેર્હરઃ પ્રેમૈવ મન્યતે ।
દુર્લભં તદ્ હરેઃ પ્રેમ કૃષ્ણભક્ત્યૈવ જાયતે ॥ ૧૦॥

હ્લાદિનીસારસમ્મિશ્રસંવિત્સારાત્મિકા ચ સા ।
મુક્તૌ હિ જ્ઞાનવૈરાગ્યે સહકારિતયા મતે ॥ ૧૧॥

કીર્તનીયો હરિનિત્યં માનદેન હ્યમાનિના ।
લઘુના તૃણતશ્ચાપિ તરુણેવ સહિષ્ણુના ॥ ૧૨॥

ઇતિ સિદ્ધાન્તપઞ્ચકે પઞ્ચમઃ પરિચ્છેદઃ । ૫।

ઇતિ શ્રીવૈષ્ણવાચાર્યપ્રણીત સિદ્ધાન્તપઞ્ચકં સમાપ્તમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Vaishnavacharyapranitam Siddhanta Panchakam*
pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*